# अभिज्ञानशाकुन्तले काव्यरसानुभूतिः

HEMARAJA.N.S
RESEARCH ASSISTANT
KARNATAKA SANSKRIT UNIVERSITY
PAMPAMAHAKAVI ROAD, CHAMARAJAPET,
BENGALORE-18
EMAIL- monihemu85@gmail.com
Ph.8310719147

'भारतस्य द्वे प्रतिष्ठे संस्कृतं संस्कृतिस्तथा' इति संस्तूयमाना असौ संस्कृतभाषा अस्माकं भारतदेशस्य प्रतिष्ठात्वेन मन्यते । अनितरसाधारणायाः सुरवाण्याः अस्याः साहित्यम् अपारम् अनुपमं च वर्तते । संस्कृतसाहित्ये प्राधान्येन वैदिकसहित्यं लौकिकसाहित्यम् इति भेदद्वयं दृश्यते । लौकिकसाहित्ये काव्यसाहित्यं शास्त्रसाहित्यम् इति पुनः भेदः वर्तते । काव्यशास्त्रयोः उपायभेदे सत्यपि उद्देश्यभेदः नास्ति । धर्मार्थकाममोक्षानां पुरुषार्थानां परिचयः लाभश्च संस्कृतसाहित्यस्य उद्देश्यम् । काव्यसाहित्यं तु विशालं सत् विपुलानां नाना प्रकाराणां काव्यानाम् आश्रयस्थानं भूत्वा सहृदयानां जनानां मनांसि आकर्षयति । काव्यानि कान्ता इव आत्यन्तिकप्रीत्या अनुनयेन च जनान् सन्मार्गे प्रवर्तयन्ति इष्टार्थं च प्रापयन्ति इति हेतोः एतेषां कान्तासंमितम् इति अभिधानम् ।

संस्कृतसाहित्यस्य प्रधानाङ्गभूते दृश्यकाव्यसाहित्ये अन्यतमः प्रकारः रूपकसाहित्यम् अत्र अध्ययनविषयस्य प्रसङ्गावधानात् ईषत् विव्रियते ।

आनन्दनिस्यन्दीनि रूपकाणि साहित्यप्रपञ्चस्य अपूर्वरमणीयं योगदानम् । साहित्यमञ्जर्याम् अभिनवं सुगन्धयुक्तं कुसुमं तु रूपकमेव इति मन्यते । अस्मिन् सङ्गीतं, साहित्यम्, अभिनयः इत्यादयः ललितकलाः सामञ्जस्येन सम्मिलन्ति । रूपकाणि आपण्डितपामरम् अनिर्वचनीयम् आनन्दम् उत्पादयन्ति । कल्पनाविलासैः भाववैभवैः सुमनोहरसन्निवेशैः च सहृदयानां हृदयाणि रङ्गस्थलम् इव परिवर्तयति रूपकम् । मानवानां रागद्वेषमदमात्सर्यादिगुणानां परिवर्तनं हृदयावर्जकरीत्या सम्प्रदर्श्य रससुधां समुत्पाद्य चित्तं संशोध्य स्वार्थात् निस्स्वार्थं प्रति नीयमाना दिव्या कला एव रूपकम् । यद्यपि नाटकं रूपकप्रभेदे अन्यतमं सदपि अर्थभेदे स्वरूपभेदे च सत्यपि सर्वेषां रूपकाणां नाटकमिति सामान्यव्यवहारः आबह्नोःकालादेव लोके दरीदृश्यते । नाटकानां विषये कविरत्नस्य कालिदासस्य वागियं लोकविख्याता । यथा –

**"देवानामिदमामनन्ति मुनयः कान्तं क्रतुं चाक्षुषं**
**रुद्रेणेदमुमाकृतव्यतिकरे स्वाङ्गे विभक्तं द्विधा ।**
**त्रैगुण्योद्भवमत्र लोकचरितं नानारसं दृश्यते**
**नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम् ॥" इति**

नाटकानां स्वारस्यसौन्दर्यास्वादनरताः 'काव्येषु नाटकं रम्यं' 'नाटकान्तं साहित्यं' 'नाट्यवेदः' इत्यादिभिः वाग्भिः प्राशंसत । भासकालिदासभवभूतिप्रमुखाः नाटकानि विरचय्य आचन्द्रार्कं यशोभाजः अभूवन् । यात्रासु उत्सवेषु पर्वसु च रूपकाणि महत्त्वपूर्णं स्थानं भजन्ते स्म । वेदकालादारभ्य अद्यपर्यन्तमपि साहित्यस्य अयं प्रकारः वर्धमानः एव वरीवर्तते । परमशिवः एव आदिनटः । तस्येयं सृष्टिरेव एकम् अद्भुतं नाटकम् इत्युच्यते । तद्यथा –

"आङ्गिकं भुवनं यस्य वाचिकं सर्ववाङ्मयम् ।
आहार्यं चन्द्रतारादि तन्नुमस्सात्विकं शिवम् ॥" इति

## ✪ नाट्यस्वरूपम् –Nature of Dramas

'नृत्''नट्' इति उभाभ्यां धातुभ्यां निष्पन्ने नृत्ते, नृत्ये नाट्ये नाटके च नर्तनं समानं सदपि एतेषां परस्परं व्यत्यासः समस्ति । काललयानुसारि नर्तनम् एव नृत्तम् । तदुक्तं –"नृत्तं ताललयाश्रयम्" इति । नृत्ते भावप्रकाशनम्, अभिनयः, सङ्गीतं वा भवेदेव इति नियमः नास्ति । नृत्ये तु ताललयसमन्वितं सङ्गीतं भवति । अस्मिन् भावाभिनयः प्रमुखः भवति । तदुक्तं – "अन्यद्भावाश्रयं नृत्यं स्यात्" इति । प्रायशः इदं नृत्यम् एकेन एव क्रियते । अस्य सुखदुःखादिभावाः रसत्वेन न परिणमन्ते । नाट्ये अपि नर्तनमस्ति चेदपि 'अवस्थानुकरणं' प्रमुखं भवति । तदुक्तं –'अवस्थानुकृतिर्नाट्यम्' इति । यः इदम् अभिनीते सः नटः । असौ नटः वेषभूषादिभिः व्यक्तिमनुकरोति । असौ इतरेषां पात्राणां साहाय्यं प्राप्नोति । नानादृश्यानि परिकल्प्य व्यक्तेः भावं, वृत्तान्तं च अभिनयति । प्रेक्षकाणां रसभोजनं भोजयति ।

नाट्यमिदं 'रूपम्''रूपकम्' इति च कथयन्ति । तदुक्तं –"रूपं दृश्यतयोच्यते" "रूपकं तत्समारोपात्" इति । नाट्यं तु नृत्यस्य विस्तृतरूपम् । नाट्ये गद्यप्रवेशेन सम्भाषणस्य कथायाः वृद्धये आनुकूल्यं वर्तते । नृत्यगीतवाद्यादिभिः नाटकस्य विशेषकान्तिः लभ्यते । नाटकं यदि गीतमयं भवति तदा तत् गीतनाटकम् इति कथ्यते । अत्र गीतैः सह नाट्यम् अपि भवति ।

पूर्वं नृत्यगीतानि सम्मील्य एतेषाम् अभिनयः क्रियते स्म । कानिचन संस्कृतनाटकानि चम्पूकाव्यानि इव वर्तन्ते । दीर्घसमासभूयिष्ठानि पद्यमयानि च इमानि बृहन्ति नाटकानि प्रदर्शनापेक्षया पठनार्थमेव लिखितानि इव भासन्ते । भरतमुनिः नाट्यशास्त्रे नाट्यांशान् विस्तरेण प्रस्थापयति । नाट्यशास्त्रस्य कारिकायां नाट्यांशानां सङ्ग्रहः वर्तते ।

**"रसा भावा ह्यभिनयाः धर्मिवृत्तिप्रवृत्तयः ।**

**चतुर्मुखोऽथवा ब्रह्मा विदुर्नान्ये मादृशाः ॥" इति**

## ✪ अभिज्ञानशाकुन्तले रसनिरूपणं रसविमर्शश्च -Picturistion and Critical Study of Rasa in Abhijnana Shakuntalam

रस्यते आस्वाद्यते रसादिः इति रसः। तादृशः रसः नव । रसादिः इति कथनात् रसाभासभावभावाभासादयोऽपि गृह्यन्ते । रसाभासादयोऽपि गौणेन रसशब्देन व्यपदिशति हि । रसनधर्मयोगात् । रसापेक्षया उक्तभावादयः प्रधाना भवन्ति तर्हि ते भावध्वनिरिति आहूयन्ते । एवं काव्येषु रसप्रवाहः भवेत् । प्रस्तुते अभिज्ञानशाकुन्तले नाटके रसः तत्पोषकगुणालङ्काररीतयः विद्यन्ते । एवं काव्यगुणसम्पन्ने नाटकेऽस्मिन् रसविषयं विमृशामः । नाटकलक्षणे मुख्यरसः शृङ्गारो वीरो वा भवेत् अन्ये हासादयो अङ्गाः भवेयुः इति नियमो अस्ति । तद्वत् अस्मिन् शाकुन्तले शृङ्गारः प्रधानः भवति शाकुन्तले रसचिन्तनं प्रस्तुतं वर्तते । नाटकं ख्यातवृत्तं स्यात् इत्यादि नाटकलक्षणमत्र अभिज्ञानशाकुन्तले समन्वीयते इति तत् नाटकमिति सिद्ध्यति । रसविषये नाटकलक्षणो इदमुक्तम् –

**"एक एव भवेदङ्गी शृङ्गारो वीर एव वा ।**

**अङ्गमन्ये रसाः सर्वे कार्यो निर्वहणोऽद्भुतः ॥"** [22]

शृङ्गारवीरयोः द्वयोः कश्चन एकरसः प्रधानः स्यात् । तौ विहाय अन्ये रसाः अङ्गं भवेयुः । तद्वत् अत्रापि प्रधानरसश्चिन्तनीयः । इह हि शृङ्गाररसः प्रधानः । वीरहासशान्तादयो अङ्गरसाः । अत्र वीरादीनां कस्मिंश्चिदपि अङ्कप्राधान्यं नास्ति । केषुचित् नाटकेषु अङ्गरसा ये सन्ति ते क्वचित् अङ्केषु प्राधान्यमावहन्ति । किन्तु अत्र तथा कस्मिंश्चित् अङ्के तेषामङ्गरसानां प्राधान्यं न सन्ति । किन्तु तत्र तत्र अङ्कमध्ये अङ्कान्ते वा एते दृश्यन्ते । पूर्णाङ्कव्यापी न कोऽपि अङ्गरसो वर्तते अत्र अभिज्ञानशाकुन्तले । इह नाटके विविधभावाः प्राधान्येन आस्वाद्यतामाप्नुवन्ति । पितरि सुतागतरतिः संख्या सखीगत रतेः शिष्ये गुरुगतरतिः गुरौ शिष्यगतरतिः च व्यज्यते प्राधान्येन तस्मात् तादृशीरतिः भावध्वनिः इति स्वीक्रियते । सोऽपि रसः इति व्यपदिश्यते । अलङ्कारशास्त्रे रसादिरिति पदकुक्षौ रसाभासभावतादृसाभासादयः उक्तत्वात् प्रधानतया व्यज्यमानो भावोऽपि रसत्वेन व्यवह्रियते । एवञ्च भावादयोऽपि प्रधानरसपोषकाः भूत्वा अङ्गानि सन्ति । तेषां भावध्वनिरिति नाम्ना आहूयते शास्त्रकारैः । पूर्वमेव

उक्तः प्रधानरसो शृङ्गारो अभिज्ञानशाकुन्तले । स च शृङ्गारः विप्रलम्भः सम्भोगश्चेति द्विधा विभज्यते । इह नाटके सम्भोगशृङ्गारः अङ्गिरसः । स च विप्रलम्भशृङ्गारेण परिपुष्टस्सन् शोभते । एतस्मात् अत्र विप्रलम्भोऽपि आस्वाद्यमानो अस्ति । प्रथमाङ्के दुष्यन्तशकुन्तलयोः परस्परदर्शनं सञ्जातम् । तद्द्वारा द्वयोः शृङ्गाराङ्गारो अभवत् इति सम्भोगशृङ्गार इति वदामः । द्वितीयाङ्के विप्रलम्भशृङ्गारः विदूषकवचनेषु हास्यरसोऽपि अस्ति । तृतीयाङ्के विप्रलम्भशृङ्गारः सम्भोगशृङ्गारश्च विलसति । तत्र तत्र विविधव्यभिचारिभावा अपि ध्वनिपदं यान्ति । चतुर्थाङ्के पितृगतरतेः सखीगतरतिश्च प्रधानतया व्याज्यमाना भावध्वनित्वेन व्यवह्रियते । केचन अत्र भ्रमवशात् करुणरस इति वदन्ति । परं तत् असाधुः । पित्रा सुतायाः पतिगृह प्रमाणम् सुतरामिष्यते न तु खिद्यते । तत्समये जात दुःखं तात्कालिकं शाश्वदिकं न । शश्वदिके दुःखे करुणरसवासः । पतिगृहप्रेषणावसरे पितृगतसुतविषयकरतिरेव युज्यते इति सः रतिभावध्वनिरिति मन्येत । लोके न कोऽपि पिता जीवनान्तं सुतायाः पतिगृहप्रेषणं शोचति । एवं च चतुर्थेङ्के करुणरसशङ्का अपास्ता । पञ्चमाङ्के न कोऽपि रसः प्रधानतया अभिव्यज्यते । अत्र दुष्यन्तशार्ङ्गरवयोः वाक्कलहः वर्णितः । अपि च शकुन्तलायाः विषादो वर्णितः । परमत्र अमर्षचिन्ता विषाद ग्लानि निर्वेदादिभावाः प्रधानतया अवगम्यन्ते । पञ्चमाङ्के अन्ते अद्भुतरसः आस्वाद्यते । षष्ठे अङ्के विप्रलम्भशृङ्गारः प्रधानतया अभिव्यज्यते । तद्विप्रलम्भशृङ्गारं हास्यरसः पोषयति । विदूषकवचने हास्यरसानुभूतिः भवति । वीराद्भुतरससम्बन्धिनो विविधभावा अपि तत्र तत्र अनुभूयन्ते । सप्तमोङ्के दुष्यन्तशकुन्तलयोः समागमो जायते । तस्मात् विप्रलम्भः सम्भोगशृङ्गारे विश्रान्तिं गच्छति । अत्र शृङ्गारेण सह शान्तरसोऽपि दृश्यते । एवमेव वीररससम्बन्धिभावा अपि सन्तीति वयं वदामः । कश्यपमहर्षेः शकुन्तलाविषयकपुत्रिकारतिः राज्ञि महर्षिगतरतिः पुत्रविषयकरतिरित्यादि रतिरेव विवाधालम्बने स दयगोचरो भूत्वा रतिभावध्वनित्वेन अनुभूयते । अन्तिमाङ्के विविधभावाः दृष्टिपथमायाति । एवमेव समग्रनाटके शृङ्गाररसेन सह विविधभावा प्रधानाप्रधानरूपेण अनुभूयते ।

**प्रथमाङ्के दुष्यन्तः शकुन्तलां दृष्ट्वा तत्र वर्तमानयोः सख्योः वचनं च श्रुत्वा तत्सङ्गतिमेवम् आह –**

**"अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू ।**

**कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम् ॥"** [27]

शकुन्तलायाः अधरः किसलयरागयुक्तोऽस्ति । बाहू मृदुशाखानुकारिणौ भवतः । कुसुममिव लोभनीयं यौवनं विजृम्भितं प्रकटितम् तस्याः । सख्या प्रियंवदया पूर्वं उक्तमस्याः लतासादृश्यं युज्यते एव । इति दुष्यन्तस्य आशयः । अत्र नायकस्य दुष्यन्तस्य नायिका शकुन्तला आलम्बनविभावः, उद्यानवनपरिसरनायिकासौन्दर्याणि नायिकाविषयसखीवचनानि च उद्दीपनविभावः, हर्षोत्साहावहित्थाः व्यभिचारिणः, एतेषां विभावादीनां संयोगात् रतिस्थायिभावः सामाजिके प्रकृष्टोद्बुद्धस्सत् शृङ्गाररसमाप्नोत् । अत्र नायिकागुणकथनादिविप्रलम्भस्य उदाहरणं भवति । अत्र उपमालङ्कारः आर्यावृत्तं च उपमालङ्कारं प्रकृतरसं पोषयति । वैदर्भी रीतिः प्रसादगुणं च सहकारिणौ रसास्वादने कर्मणि । पूर्वोक्ताङ्के एव तस्मिन्नेव सन्दर्भे च शकुन्तलारूपं दृष्ट्वा तस्याः परिचयं सखीभ्यां ज्ञातः दुष्यन्त वर्णयति ताम् । तद्यथा –

**"मातुषीषु कथं वा स्यादस्य रूपस्य सम्भवः ।**

**न प्रभातरलं ज्योतिरुदेति वसुधातलात् ॥"**[28]

शकुन्तला अप्सरसम्भवा इति सखीमूलकेन ज्ञायते दुष्यन्तेन । तत्समर्थयन् उपरिवत् वर्णयति । मानुषिषु एतस्य लोकोत्तरसौन्दर्यादिगुणगणविशिष्टस्य शकुन्तलारूपस्य सम्भवः कथं स्यात् ? तादृग् सौन्दर्यं मातुषस्त्रीजातकन्यासु न दृश्यते इति । प्रभातरलं वसुधातलात् न उदेति खलु यथा प्रकाशः भूमेनोदिति तथेयं शकुन्तला न मनुष्यसम्भवा, अप्सरः सम्भवा एव इति भावः । अत्र नायकस्य दुष्यन्तस्य शकुन्तला आलम्बनविभावः, एवं नायिका शकुन्तलायाः दुष्यन्त आलम्बनविभावः , वनसखीवचननायिकासौन्दर्यं उद्दीपनविभावः, रोमाञ्चाभिलाषनायिकागुणकथनपरस्पर्शदर्शनादि अनुभावः, हर्षोत्साहधृतिमतिलज्जादयो व्यभिचारिणो भावाः , एतैः विभावानुभावव्यभिचारिभावैः साधारण्येन व्यापारेण अभिव्यक्तः सामाजिकरतिभावः शृङ्गाररससरूपम् आप्नोति । अत्र दुष्यन्तवचने सत्यपि अत्र परस्पररतिः प्रकरणवशात् ज्ञायते इति कृत्वो परस्परालम्बनविभावत्वम् अस्तीति अयं सम्भोगशृङ्गारः यद्यपि लज्जाव्यभिचारिभावः श्लोकेन नावबुध्यते तथापि श्लोकानु प्रसङ्गात् इति तस्य स्वीकरणमत्र न दोषः । एवं च सम्भोगशृङ्गाररसप्रतीतौ न कापि हानिरत्र श्लोके । नायिकानायकयोः शकुन्तलादुष्यन्तयोः परस्परालम्बनविभावत्वं प्रकरणवशात् आनुपूर्विकथासञ्चलनात् च अवगम्यते इति स्पष्टम् । अत्र निदर्शनालङ्कारः अनुष्टुप् छन्दश्च वैदर्भीरीतिः प्रसादगुणश्च रसप्रतीतौ सहकारिणः । एतत्सर्वं महाकविना औचित्यपूर्णम् उपन्यस्तम् ।

प्रथमाङ्के उक्तप्रसङ्गे शकुन्तलाविषयकं ज्ञातुकामो दुष्यन्तः सखीमुद्दिश्य कथयति इदम् –

**"वैखानसं किमनया व्रतमाप्रदानाद्–**
**व्यापाररोधिमदनस्य निषेवितव्यम् ।**
**अत्यन्तमेव मदिरेक्षणवल्लभाभि–**
**राहो निवत्सस्यति समं हरिणाङ्गनाभिः ॥"**[29]

अनया शकुन्तलया मदनस्य व्यापाररोधि मुनिकाव्यकोचितं ब्रह्मचर्यं वैखानसव्रतं विवाहविधिः यथावद् अनुष्ठेयम् किम् ? उताहो मदिरेक्षणवल्लभाभिः हरिणाङ्गनाभिः समं आमरणं निवत्स्यति किम् ? विवाहविधि ब्रह्मचर्यमस्या आहोस्वित् किमपि यावज्जीवमेव नैष्ठिकब्रह्मचर्यपूर्वकं स्वसदृशीभिः मृगाङ्गनाभिः सह निवासं करिष्यतीति भावः । अयमर्थः अत्र ध्वनितो भवति यत् यदि एषा कस्मैचित् राज्ञे प्रदेया तदा विवाहपर्यन्तमेव तपोवने स्थास्यति, यदि न कस्मैचित् तपस्विने प्रदेया तर्हि मृगमिथुनवत् कामोपभोगरहिता वने एव स्थास्यति इति । अयं वस्तुध्वनिः । अत्र नायकस्य दुष्यन्तस्य शकुन्तला नायिकायाः शकुन्तलायाः दुष्यन्तश्च परस्परमालम्बनविभावः । वनसखीवचननायकनायिकापरस्परदर्शनश्रवणादीनि उद्दीपनानि, नायके अभिलाषचित्तोद्वेगगुणकथनादिः नायिकायां लज्जाकृतककोपनयकदर्शनाकाङ्क्षासविलासदिश्च अनुभावाः, द्वयोः नायकनायिकयोः हर्षोत्साहतर्कलज्जाऽवहित्थादयो व्यभिचारिभावाः, एतैः विभावादिभिः परिपुष्टः रतिस्थायिभावः सामाजिको शृङ्गाररसतामेति । स च सम्भोगशृङ्गारः रतेः नायिकानायकोभयनिष्ठत्त्वात् परस्परदर्शनादिकृतत्वाऽ । अत्र केवलं दुष्यन्तवचने सत्यपि अत्र परस्पररतिः प्रकरणवशात् आनुपूर्विकथासञ्चालनात् च अभिव्यज्यते । तस्मात् सम्भोगशृङ्गाररसप्रतिपादने न कापि क्षतिः । पुर्वमत्र वस्तुध्वनिरपि कथितः सोऽपि वस्तुध्वनिः व्यञ्जनया गम्यते । प्रथमाङ्के शकुन्तलाविषयकसखीवचनं श्रुत्वा दुष्यन्तस्य स्वगतोक्तिः यथा–

**"भव  दय साभिलाषं सम्प्रति सन्देहनिर्णयो जातः ।**

**आशङ्कसे यदग्नि तदिदं स्पर्शक्षमं रत्नम् ॥"इति**

अथ प्रियंवदोक्त्या शकुन्तलाया राजकन्यात्वानुरूपवरप्रदानविषये कुलपतेः कण्वस्य संकल्पं श्रुत्वा तस्मात्परिग्रहयोग्यां निश्चित्य प्रियशङ्काकातरं स्व दयं सहर्षमेवमाह– हे दय ! सम्प्रति किमियं मद्योग्या न वेति सन्देहो निवृत्तः । अतः त्वं यथेष्टमेवामभिलषा यत् पुरोदृश्यमानं शकुन्तलावस्तुरूपम् अग्निम् आशङ्कसे तदिदं वस्तु स्पर्शक्षमं रत्नमस्ति ।

नेयं ब्राह्मणकन्यका क्षत्रियाप्सरोभ्यां सम्भवा , मत्परिग्रहणयोग्या च इति निश्चयः अभूत् इति भावः ।

अत्र नायकस्य दुष्यन्तस्य नायिका शकुन्तला आलम्बनविभावः, वननायिकासौन्दर्यतद्विषयसखीवचनदर्शनादिः उद्दीपनविभावः, अभिलाषहर्षमतिधृत्युत्साहादयः व्यभिचारिणः, एतैः विभावादिभिः परिपुष्टरतिः सामाजिके शृङ्गाररसताम् आप्नोति अयं शृङ्गारः सम्भोगः ।

यद्यपि दुष्यन्तस्य स्वगतोक्तौ सत्यमपि नायिकाप्रत्युक्त्यभावे नायिकायां शकुन्तलायां नायकनिष्ठरतिः प्रकरणवशात् स्वयं तस्याः उपस्थितेः च अभिव्यज्यते इति कृत्वात्र सम्भोगशृङ्गारः । परस्पररतिरूपो स इति ज्ञेयः । अत्र काव्यलिङ्गालङ्कारः जातिः आर्या च ।

प्रथमाङ्के शकुन्तलाविषये दुष्यन्तस्य उक्तिः सखी प्रियंवदाम् । सेयं यथा –

**"स्रस्तांसावतिमात्रलोहिततलौ बाहू घटोत्क्षेपणा–**

**दद्यापि स्तनवेपथुं जनयति श्वासः प्रमाणाधिकः ।**

**बद्धं कर्णशिरीषरोधि वदने घर्माम्भसां जालकं**

**बन्धे स्रंसिनि चैकहस्तयमिताः पर्याकुलामूर्धजाः ॥"इति**

वृक्षाणां सेचवादव्यन्तं परिश्रान्तायाः शकुन्तलायाः परिश्रमलक्षणाति वर्णयति राजा दुष्यन्तः– घटोत्क्षेपणात् अस्याः शकुन्तलायाः बाहू अवनतौ स्तः । करतलौ अत्यन्तं लोहितौ सञ्जातौ । घटोत्क्षेपणादेव प्रमाणेन अधिकः निश्वासवायुः वृक्षसेचनकार्ये अवसितेऽपि स्तनयोः कम्पं जनयति । वदने कर्णाभरणं शिरेषुपुष्परोधि स्वेदजलानां जालकं संस्क्तं दृश्यते । स्वेदजलेन कर्णशिरीषं गण्डस्थले आसक्तं सत् तथा न तरलितं भवतीति स्वेदोदकस्य कुसुमरोधकत्वं स्फुटम् । अत्र दुष्यन्तस्य नायिका शकुन्तला आलम्बनविभावः, वननायिकासौन्दर्यदर्शनसखीवचनानि उद्दीपनविभावाः, अभिलाषानन्दगुणकथनसौहित्यवचनानि अनुभावाः, हर्षोत्साहमतिधृतिशङ्कादयो व्यभिचारिभावाः, एतैः विभावादिभिः उद्बुद्धः रतिस्थायिभावः सामाजिके शृङ्गाररसताम् एति । रतेः दुष्यन्तशकुन्तलयोः नायकनायिकयोः उभयनिष्ठत्वात् सम्भोगशृङ्गारः अयम् ।

एवञ्च –

**"मुहुरङ्गुलिसंवृताधरोष्ठं प्रतिषेधाक्षरविक्लवाभिरामम् ।**

**मुखमंसविवर्ति पक्ष्मलाक्ष्याः कथमप्युन्नमितं न चुम्बितं तु ॥"[43]**

गौतम्यागमनेन विहिनतमनोरथायाः शकुन्तलायाः ताभिः सह प्रस्थाने कृते तमेव शकुन्तलापरिभुक्तमुक्तं लतामण्डपमुपेत्य दीर्घं निःश्वस्य राजा दुष्यन्तः ब्रवीति पक्ष्मलाक्ष्याः अङ्गुल्या संवृतमधरोष्ठं मा मा नहि नहि अलमित्यादिनां प्रतिषेधाक्षराणां स्फुटमनुच्चारणेन सुन्दरं मुहुर्मुहुः स्कन्धपरावर्तनशीलं मुखं मया (दुष्यन्तेन) अतिकृच्छ्रेण चुम्बनार्थमुन्नमितं न तु यथेच्छं चुम्बितम् । गौतम्या आगमनात् अधरास्वादो न लब्धः । अत्र नायकस्य दुष्यन्तस्य शकुन्तला आलम्बनविभावः, लतामण्डपनदीतीरवातावरणसुरतानुकूलैकान्तनायिकोपस्थितिनिर्गमनानि उद्दीपनविभावाः, सम्प्रलापोच्छावासनिःश्वासस्वेदरोमाञ्चाः अनुभावाः, हर्षोत्साहावेगोन्मादविषादाः सञ्चारिभावाः, एतेषां विभावादीनां संयोगात् रतिस्थायिभावः सामाजिके शृङ्गाररसतामाप्नोत् । अत्र सम्भोगशृङ्गारः । नायिकायाः क्षणात् पूर्वपरिभुक्तिः, सद्यो निर्गमनं नायके तस्याः गाढानुरागः विघ्नरहिते इतोऽपि परिभोगासक्तिः च प्रकरणवशात् प्रतीयन्ते तथा च नायिकानिष्ठनायकरतेः विच्छित्यभावः मानसिकसंयोगश्च वर्तते इति कृत्वा अत्र सम्भोगशृङ्गारः । अभिज्ञानशाकुन्तले नाटके शान्तरसोऽपि वर्तते । सप्तमाङ्के कश्यपाश्रमः तद्विषयो विद्यते । अत्र केचन श्लोकाः शान्तरससम्बद्धाः शान्तरससरतद्धनिर्वेदादिभावयुक्ताः सन्ति । दुष्यन्तः मातलिना सह हेमकूटस्थं कश्यपाश्रममवतरति आकाशमार्गेण तदा कश्यपस्य तपः तदाश्रमपरिसरं च बहुधा प्रशंसते । तत्कालिकः श्लोकोऽयम् –

"प्राणानामतिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने

तोये काञ्चनपद्मरेणुकपिशे घर्माभिषेकाक्रिया ।

ध्यानं रत्नशिलातलेषु विबुधस्रोसंनिधौ संयमा

यत्काङ्क्षन्ति तपोभिरन्यमुनयस्तस्मिंस्तपस्यन्त्यमी ॥"[57]

महर्षेः कश्यपस्याश्रमावलोकेन सर्वतो विस्मयमनुभवन् राजा दुष्यन्तो मातलिं वदति – सत्कल्पवृक्षे वने तपश्चरणयोग्या जीवधारणं भवति वायुना । काञ्चनपद्मानां परागैः पिङ्गलवर्णे तोपे घर्माय अभिषेकस्य विधिः भवति । रत्नानां शिलातलेषु ध्यानं भवति । अप्सरसां सन्निदौ इन्द्रियनिग्रह अभ्यस्यते । अन्ये मुनयः कृच्छ्रैः तपोभिः यद् यद् वस्तु स्वर्गादिकं वा इच्छन्ति तादृशो अपि वस्तु मध्ये अस्य आश्रमस्य मुनयः तपस्यन्ति अन्यमुनिभिः कश्यपाश्रमः तस्य मुनयश्च भिन्नाः दृश्यन्ते स्वविशिष्टगुणैश्च इति श्लोकस्य तात्पर्यम् ।

अत्र दुष्यन्तस्य वचनस्य आलम्बनविभावः कश्यपाश्रमः विशिष्टतपोगुणमुनयः आश्रमवातावरणम् उद्दीपनविभावः, रोमाञ्चहर्षप्रसन्नताः अनुभावाः, हर्षविस्मयोत्साहादयः व्यभिचारिभावाः, एतेषां विभावादीनां संयोगात् शमस्थायीभावः सामाजिकानां सामाजिकेषु साधारणीकरणमाप्त्वा शान्तरसतां भजते । अत्र कश्यपाश्रम आलम्बनविभाव इति उक्तः समग्राश्रमवर्णनात् । आश्रमवातावरणपावित्र्य विशिष्टाय कारणं कश्यपप्रभावः । शान्तरसस्य स्थायिभावः शमः ।

अतिधवलवर्णः श्रीनारायणः देवता च । शमस्थायीभावस्य आधारः उत्तमप्रकृतिः स्यात् । वैराग्यं परमात्मवस्तुनियत्वं यत्र त्र शान्तरसोऽयमास्वाद्यते ।

अभिज्ञानशाकुन्तले महोन्नतनाटके विविधरसभावाः सन्ति चेदपि समग्रप्रबन्धात्मकदृष्ट्या विचारयामः चेत् अत्र प्रधानरसः शृङ्गारः । कारणं तस्य उपरि विवृतम् । तं सम्भोगं विप्रलम्भः परिपोषयति । अङ्गरसाः विविधभावाः च आस्वाद्यन्ते । विविधरसभावानां सन्ततप्रवाहेन नाटकमेकम् आस्वाद्यते खलु । प्रकृते शाकुन्तले रूपके उक्तसर्वांशकारणात् एतत् प्रसिद्धनाटकमिति सर्वैः पण्डितपामरैः परिगण्यन्ते । एवञ्च अस्मिन् नाटके अनेके रसाः अङ्गभूताः सन्तः श्रुङ्गारं परिपोशयन्ति । अतः इदं नाटकं सहृदयानन्दोत्पादकं काव्यमिति विदुषां अभिप्रायः ।

## परामर्शनग्रन्थाः


१. श्रीकृष्णमणिः त्रिपाठी – अभिज्ञानशाकुन्तलस्य विमला–चन्द्रकला–संस्कृतहिन्दीव्याख्यानम्

२. ध्वन्यालोकः आनन्दवर्धनः, चौकम्बा पब्लिकेशन्स्, वाराणसी, १९८०

३. साहित्यदर्पणः, विश्वनाथः, चौकम्बा पब्लिकेशन्स्, वाराणसी, १९७५

४. काव्यप्रकाशः, मम्मटःचौकम्बा पब्लिकेशन्स्, वाराणसी,२०००

५. अभिज्ञानशाकुन्तलम्, कालिदासः, चौकम्बा पब्लिकेशन्स्, वाराणसी, २००३

६.रामायणम् – वाल्मीकिमुनिः, परिमलपब्लिकेषन्स्, दिल्ली, १९९१ ।

७. वृत्तरत्नाकरः – केदारबट्टः, लक्ष्मीवेङ्कटेश्वरप्रेस्, कल्याण, मुम्बई, १८५० ।


---